GRAND ACADEMIC PORTAL
RESEARCH JOURNALS

GAP भाषा
A MULTILINGUAL JOURNAL OF RESEARCH
( ISSN – 2582-8770 )
Globally peer-reviewed and open access journal.

# संस्कृतशतककाव्यविधायाः कृते कवयित्रीणां अवदानम्

**सौ. भारती विजय कोळेकर, प्रो. नन्दा ज. पुरी**

अनुसन्धात्री
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः,
मौदा रोड, रामटेकं, जि. नागपूरं - ४४११०६.
ई-पत्रसङ्केतः - **bhaviko11081966@gmail.com**

मार्गदर्शिका
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः,
मौदा रोड, रामटेकं, जि. नागपूरं - ४४११०६.

भारतीयाणां समस्तं प्राचीनं ज्ञानभाण्डारं संस्कृतसाहित्य एव समाहितमस्ति। कयाऽपि दृष्ट्या वा केनापि अनुषङ्गेण कृतविचाराः वयं सर्वे अवगच्छामः यत् ज्ञान-विज्ञानविषयकमस्यां न विद्यते इति नास्ति एतादृग्विषयो यः संस्कृतभाषायां विद्यमाने साहित्ये उपलब्धः न भवति। भारतीयाणां कृते प्राणभूतायामस्यां संस्कृतभाषायामेव भारतीयजनानां मनन-चिन्तन-गवेषण-अनुभूतयः समन्विताः सन्ति। यदिदं एतावत् विस्तृतं संस्कृतवाङ्मयम् उपलब्धभूतमस्ति तत् सर्वमृषिमहर्षिमनिषिकवितत्त्ववेतृणां ज्ञानसाध्यफलं वर्तते। स्त्रीणामपि सहभागः तत्र निश्चितेनैव भवति। वैदिककालादारभ्य महिलारचनाकर्त्रीणां परम्पराप्राप्तं वर्तत अस्माकं संस्कृतसाहित्यम्। सुसमृद्धसंस्कृतसाहित्ये दृश्यमाना सरसमहिलारचनाकर्त्रीणामेषा काव्यपरम्परा अत्यन्तं पुरातनी सुदीर्घा च। पुरातनीपरम्परैषा प्रथमशतीख्रीष्टियाब्दस्य पूर्वतः परवर्तिकालपर्यन्तम् अविच्छिन्नतया प्रवर्तमाना परिलक्ष्यते। साहित्यपरम्परायाः अस्याः विस्तारः यद्यपि पुरुषरचनाकर्तॄणां महिला-रचनाकर्त्रीणाञ्चोभययोः लब्धयोगदानाज्जातोऽस्ति तर्हि विदुषान्तुलनापेक्षया विदुषीणां नामानि अल्पसङ्ख्यकानि उपलब्धानि भवन्ति। प्राचीनशास्त्रेषु नैकासां कवयित्रीणां नामानि उपलभ्यन्ते। शौनकस्य बृहद्देवतायां ब्रह्मवादिनीनां उल्लेखः समुपालभ्यते। वैदिकसंस्कृतसाहित्ये घोषा, अपाला, विश्ववारा, गोधा, सूर्या, सावित्री, वागम्भृणी, लोपामुद्रा, लोमशा अथवा रोमशा वा, उर्वशी इत्यादयः ब्रह्मवादिन्यः स्त्रियः तथैव प्राचीन-मध्यकालीन-लौकिकसंस्कृतसाहित्ये कवयित्रीषु प्रसिद्धानां विज्जा-मारुला-मौरिका- विकटनितम्बा-मदालसा-शिलाभट्टारिका काव्यमीमांसाकारराजशेखरस्य पत्नीः अवन्तिसुन्दरी, गङ्गादेवी-रामभद्राम्बा-तिरुमलाम्बा-देवकुमारिका-विश्वासदेवी-बीमाबाई-चिन्नम्मा-प्रियंवदा-वैजयन्त्यादीनां नैकासां विदुषीणां नामानि समाविष्टानि सन्ति। संस्कृतसाहित्यपरम्परायाः विद्वद्भिः साहित्यकारैः काव्यशास्त्राधारिता विस्तृतविषयस्वरूपस्य तथैव सङ्क्षिप्तविषयस्वरूपस्येति विविधसाहित्यनिर्मितिः कृतास्ति। विद्वद्भिरिव विदुषीभिरपि स्वविचारोद्भूताः अद्भुतसंवेदनाः नाटककाव्यादीनां माध्यमेन व्यक्ताः कृताः स्वस्य च वैदुष्यस्य आविष्कारः कारितः। पुरुष-साहित्यिकैः रचनाबद्धकृतानां रचनानाञ्च व्याख्याः, समीक्षणानि, टीकादीनि अपि च तत्तत्काले सम्पादितकृतानि पुनर्विश्लेषणानि, भाषान्तराणि इत्येतेषां माध्यमेन एकस्याः एव कृतेः विविधपद्धत्या साहित्यिकसमाजे कृतविनियोजनेन ताः रचनाः बहुलां प्रसिद्धिं प्राप्नुवन्। इत्थमेकस्याः एव रचनायाः भिन्नभिन्नस्वरूपस्थिताः आवृत्तयः उपलब्धभूताः। तस्मात् स्वाभाविकमेवासीत् यत् इमाः रचनाः प्रति रसिक-वाचक-संस्कृत-साहित्यप्रेमिजनानां ध्यानं सातत्येन आकृष्टमभवत्। अन्यत् कारणम् इदमपि स्यात् - तत्तुलनया महिलासाहित्यिकाभिः रचिताः गण्याः प्रदीर्घकाव्यनाटकादिरचनाः विहाय स्फुटकाव्यरूपाः नाम प्रत्येकं स्वतन्त्रपद्यरचनाः मुक्तकस्वरूपरचनाः पद्यसङ्ग्रहेषु सङ्कलिताः। एवमुदाहरणरूपेण उल्लेखितानि यानि पद्यानि रचनाकर्त्र्याः यस्याः मूलग्रन्थरचनायाः उद्धृतानि आसन् ते मूलग्रन्थाः निर्लक्षितभूताः। अतः परिणामः एवञ्जातः यद्, पुरुषसाहित्यकाराः रचनासमृद्धाः अभवन् किन्तु महिलासाहित्यकर्त्र्यः अपेक्षया गौणीभूताः। किम्बहुना तत्तत्कालीन सामाजिक परिस्थितेरेवैष प्रभावो स्यात्। पुरुषसाहित्यकर्तॄणां कृतयः यथावत् नित्यं नूतनविस्तृतरूपमाहार्य सातत्येन रसिकसमाजस्य दृष्टिपुरतः उपस्थिताः तथावत् विदुषीणामेतासां महिलासाहित्यकर्त्रीणां रचनाकार्यं रूपवैविध्येन विस्तारितं नाभवत् तथैव च साहित्यनिर्मितिं कर्तुं महिलानां कृते प्रत्यक्षाप्रत्यक्षतया प्रोत्साहनाभावोऽपि अवर्तत। एतद्भिन्नमपि एकं कारणं भवेत् यद् साहित्यरचनाः कुर्वन्त्यः अत्यल्पसङ्ख्यकाः महिलाः। तस्मात् ताभिः रचितं साहित्यं तु सङ्ख्ययाऽपि

https://www.gapbhasha.org/

मर्यादितमेवाभवत्। तद्दृष्ट्या एवमेव आधुनिकेकालेऽपि एषा परिस्थितिः न तावती भिन्ना दृश्यते। संशोधनप्रपत्रस्य **संस्कृतशतककाव्यविधायाः कृते कवयित्रीणामवदानमि**ति शीर्षकानुरूपं प्रथममत्र कासाञ्चन कवयित्रीणामुल्लेखो कर्तुमिच्छति प्रपत्रं पठन्ती अनुसन्धात्री।

अर्वाचीनसंस्कृतसाहित्यपरम्परायाम् आनन्दमयी देवी, उमादेवी, उमा देशपाण्डेयः, ऋता त्रिवेदी, करुणामयी, कामाक्षी, पण्डिता क्षमा रावः, ज्ञानसुन्दरी, त्रीवेणी, नलिनी शुक्ला, मिथिलेशकुमारी मिश्रः, दुर्गा पारखीत्यादयः विदुष्यः कवयित्र्यः सन्ति। एतत्तुलनया पुरुषसाहित्यकाराणां सङ्ख्या बह्वी वर्तते। पर्यायेण साहित्यकृतीनां सङ्ख्याविषयकमपि इत्थमेव अनुपातः स्वीकरणीयः भवेत्। शतककाव्यसाहित्यमपि न तत्र अपवादात्मकम्। अर्थादेव, अस्य शतककाव्यप्रकारस्य रचनाकारेषु कविभिः कृततुलनया कवयित्रीणां सङ्ख्या प्रमाणतः अत्यल्पा एवास्ति। संस्कृतसाहित्यपरम्परायां महिलालेखिकानां नाम कवयित्रीणां शतककाव्यरचनाकार्यमधिकृत्य विषयवस्तुविवेचनस्य यथामति एकः प्रयत्नोऽस्ति संशोधनपत्रमेतत्।

संस्कृतशब्दकोशेषु साहित्यमित्येतस्य शब्दस्य अर्थः - **'विशेषतः उत्कृष्टा वा चिरस्थायिनी वा कलात्मकगुणवत्ता विद्यमाना लिखितकृतिः इति परिगणिता रचना'** इत्यस्ति। एवमेव तादृशी लघ्वी काव्यरचना यस्यां शतकमिति संज्ञामनुगुणं शत(१००)पद्यानां समावेशनं विद्यमानमस्ति सा रचना नाम शतककाव्यमस्ति। वास्तविकतया शत(१००)पद्ययुक्तं काव्यं शतककाव्यप्रकारदृष्ट्या तदा प्रचलितमभवत् यदा षष्ठ(६)शतके भर्तृहरिविरचितं श्रृङ्गार-नीति-वैराग्यशतकत्रयस्य रचना जाता। शतककाव्यसाहित्यमिति एषः संस्कृतभाषायां विद्यमानायाः पद्यरचनायाः एकः एतादृशः विशिष्टः प्रकारो वा आकृतिबन्धो वास्ति, यस्मिन् शतं श्लोकमात्रं किंवा शतपद्यपङ्क्तयः वर्तन्ते इति न। सङ्ख्या एषा शतादधिका वा शतात् किञ्चित् न्यूना भवेत्। अन्यदेकं यत् शतककाव्यरचनायां विद्यमानानि पद्यानि रचनाकारेणैव स्वरचितानि स्युः इति एवं निर्बन्धो न वर्तते। अन्यरचनाकर्तृभिः रचितानि पद्यानि यत्र समाविष्टानि स्युः तादृश्यः अपि पद्यसङ्ग्रहरूपशतककाव्यरचना दृश्यन्ते। महत्त्वपूर्णाः अनुभवाः, उपदेशाः, जटिलाः भावनाः, आदर्शाचार-विचाराः तथैव उपास्य देवदेवताः, महान् व्यक्तिविशेषाः रम्यस्थलानि, इत्येतेषां माहात्म्यवर्णनं एतादृशाः वर्ण्यविषयाः शतककाव्यरचनासु भवन्ति।

सृजनशीलता इत्येष तु स्त्रीधर्मोऽस्ति। न केवलं पुरुषाः, पुरुषवत् स्त्रियोऽपि काव्यरचनां कर्तुं शक्नुवन्ति। काव्यमीमांसानामके स्वरचितग्रन्थे कविप्रकाराणां वर्णनं कुर्वता राजशेखरेण स्वमतं स्पष्टं लिखितमस्ति यत्, न केवलं पुरुषाः काव्यरचनां कर्तुं शक्नुवन्ति अपि तु स्त्रियोऽपि काव्यरचनां कर्तुं समर्थाः सन्ति। अत्र कवित्वशक्तिः संस्कारविशेषेण प्राप्यते स च संस्कारः आत्मनि नित्यसम्बन्धत्वेन वा समवायसम्बन्धत्वेन तिष्ठति। कवित्वसंस्कारसामर्थ्यार्थं तत्र पुरुषो वा स्त्री वेति भेदः न भवति।[1] काव्यसर्जनायां महिलाभिः कृतयोगदानं स्तुत्यमपि च प्रशंसनीयमस्ति। विदुषी कवयित्रीभिः विद्वद्भिश्च कविभी रचितानां संस्कृतशतककाव्यानां सङ्ख्या अनुमानतः ९५०-१००० नाम सहस्रात् नाधिका वर्तेत। महिलाभिरनेकविधकाव्यरचनाः विरचिताः सन्ति। तत्रापि शतककाव्यमिति शीर्षकयुक्तकाव्यानां गणना १० तः न्यूना एवोपलब्धाऽस्ति। एतासु शतककाव्यरचयित्रीषु *'इन्दिराप्रशस्तिशतकम्'* इति काव्यस्य रचयित्री **शान्तिदेवी रथी**(राठी वा), *'वाणीशतकम्' अस्य* शतककाव्यस्य रचयित्री **श्रीमती नलिनी शुक्ला**, *'प्रहेलिकाशतकमि'*ति काव्यरचनाकर्त्री **सौ. दुर्गा पारखी**, *'व्यासशतकम्'* यया विरचितमस्ति सा **डॉ. मिथिलेशकुमारी मिश्रा**, *'गङ्गाशतकम्'* इति ग्रन्थरचयित्री **कमला पाण्डेयः** तथैव यया *'चपलशतकम्'* विरचितं सा **डॉ. अञ्जूरानी** एवङ्कृत्वा अङ्गुलीमेयानि एव शतककाव्यरचनाकर्त्रीणां महिलानां नामानि उपलब्धभूतानि सन्ति।

## १. शान्तिदेवीरथी(राठी)

**इंदिराप्रशस्तिशतकम्** इति शतककाव्यस्य रचयित्री शान्तिदेवीराठी किंवा शान्तिदेवीरथी वास्ति। विंशतितमे शतके महोदया जनिमलभत। ऐश्वर्यसम्पन्ने सुसंस्कृते च कुटुम्बे लब्धजन्मा इयं शान्तिदेवी बाल्यादेव अत्यन्तं गुणिनी आसीत्। अस्याः रचनाकौशल्यम् अत्यन्तं प्रभावशालि वर्तते। अनया कवयित्र्या *इन्दिराप्रशस्तिशतकमिति* काव्यं रचितं विद्यते। संस्कृतस्य शतककाव्यसाहित्ये एतत् एकम् अत्यन्तम् अनुपममवदानमस्ति। प्रियदर्शिनी इन्दिरा नाम भातरदेशस्य पूर्वपन्तप्रधानपदमलङ्कुर्वन्ती महोदया इन्दिरा गान्धिजी। अस्याः स्तुतिपुरस्सरमिदं काव्यं रचितं वर्तते। शान्तिदेव्याः विद्वत्ता अस्यां काव्यरचनायां विद्यमानैः पद्यैः सुस्पष्टं दरीदृश्यते। यद्यपि इदं काव्यं इन्दिराप्रशस्तिशतकं

[1] पुरुषवत् योषितोऽपि कवीभवेयुः। संस्कारो ह्यात्मनी समवैति, न स्त्रैणं पौरुषं वा विभागमपेक्ष्यते। - राजशेखरस्य काव्यमीमांसा।

https://www.gapbhasha.org/

नामकं शतककाव्यमस्ति तर्हि तत्र काव्ये सम्मिल्य ११६ पद्यानि विलसन्ति। काव्यस्यास्य वर्ण्यविषयो विद्यते इन्दिरागान्धिमदोदयया भारतदेशस्य संरक्षणार्थं सेवार्थञ्च कृतकार्यस्य वर्णनम्। वर्ण्यविषयानुरूपं छन्दोऽलङ्कारयोजना, प्रसादयुता मधुर-ओजोगुणसरसभावपूर्णा भाषा इत्यादिगुणवैशिष्ट्यैः काव्यमिदं शतककाव्यसाहित्ये महत्त्वपूर्णं स्थानं भजते।

ईशवीये १९९२ मध्ये हरियाणा-साहित्य-अकादम्या एतच्छतककाव्यं पञ्चकुलतः प्रकाशितम् अस्ति।

विशेषावधार्यः बिन्दुः -

हाजारिलालशास्त्रिविरचितं अन्यदपि काव्यं इन्दिराप्रशस्तिशतकमित्येव नाम्ना विद्यते। काव्यमिदमपि रोहतक इत्यत्रतः इशवीये १९८१ वर्षे प्रकाशितमभवत्।

## २. सौ. दुर्गा पारखी

*'प्रहेलिकाशतकम्'* इति काव्यरचना यया कृताऽस्ति सा कवयित्री सौ. दुर्गा पारखी। सा तस्याः संस्कृतयोगदानाय कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य राष्ट्रिय-परिषदि सत्कृताऽस्ति। तस्याः रचनासु *'काबुलीवाला,'* इति रूपकम्, *'कथासुमनस्सौरभम्'* इति मौलिककाव्यम् एताः प्रकाशिताः रचनाः वर्तन्ते। *'बालकथावल्लरी'* नामकः त्रिंशद्बालकथानां सङ्ग्रहोऽस्ति।

विशेषावधार्यः बिन्दुः -

प्रहेलिकाशतकम् इदमेव शीर्षकं स्वीकृत्य अन्यदेकं शतककाव्यं रामाशीषपाण्डेयमहोदयैः विरचितमस्ति। काव्यमेतत् हरमू, प्रबोध-संस्कृत-प्रकाशनेन राँची नगरतः ख्रीष्टीये १९९१ तमे वर्षे प्रकाशितम्।

रामनाथशास्त्रिणाऽपि प्रहेलिकाशतकं नाम्नैव शतककाव्यं विरचितमस्ति। अस्य प्रकाशनं ईशवीये १९८४ वर्षे अभूत्।

## ३. श्रीमती नलिनी शुक्ला

श्रीमती नलिनी शुक्ला इयं पण्डितइन्द्रदत्तमिश्रस्य कन्या। सा इटाओया इति जनपदस्य कन्धेसीग्रामे १९४० ख्रीष्ठियाब्दस्य जुनमासस्य अष्टमे दिनाङ्के जनिमलभत। श्रीमती नलिनी शुक्लामहोदयया वाणीशतकम् नामकं शतककाव्यं विरचितं विद्यते। कानपूरतः इशवीये १९९६ वर्षे काव्यस्यास्य प्रकाशनं कृतम् अस्ति।

इदं शतककाव्यं तथा च *'भावाञ्जलिः'*, *'स्वरूपलहरी'*, *'प्रमथरश्मिः'*, *'कथाम्बरा'*, *'प्रकीर्णम्'*, *'तर्कभाषासमीक्षणं'*, *'योगभाष्यालोकः'*, *'सप्तकम्'*, *'निर्झरिणी'* एताः निर्दिष्टकृतयः अनया महोदयया विरचिताः वर्तन्ते।

## ४. कमला पाण्डेय

*'गङ्गाशतकम्'* इति नाम्ना यानि चत्वारि शतककाव्यानि उपलभ्यन्ते, तेष्वेकं कमला पाण्डेयमहोदयया विरचितं विद्यते। शिवदत्तशर्मचतुर्वेदीकृतमेकं गङ्गाशतकमिति काव्यमस्ति, तृतीयञ्च अन्यदेकं *'गङ्गाशतकम्'* इत्येव नाम्ना हरेकृष्णशतपथीविरचितं शतककाव्यमेव वर्तते। तुरीयं चैकमन्यद् काशीस्थः पण्डितनारायणपतित्रिपाठिमहोदयः लिखितवानस्ति। एवङ्कृत्वा गङ्गाशतकम् इति नामकानि चत्वारि शतककाव्यानि भिन्नभिन्नकर्तृभिः विरचितानि सन्ति।

## ५. डॉ. अञ्जूरानी

अनया विरचितं शतककाव्यं 'चपलशतकमि'ति नाम्ना उल्लेखितं वर्तते।

## ६. डॉ. मिथिलेशकुमारी मिश्रा

डॉ. मिथिलेशकुमारीमिश्रमहोदया हरद्वयी(हरदोई)नामके जनपदे इशवीये १-१२-१९५३ तमे वर्षे जनिमलभत। भगवतीदेवी-रामगोपालश्च अस्याः मातृपितरौ। हरिद्वयीजनपद एव अनया प्राथमिकशिक्षणं स्वीकृतमासीत्। अस्याः औपचारिकशिक्षणं आचार्यः, एम्.ए., पीएच्.डी.उपाधिः, डी.लिट् पर्यन्तं वर्तते। लखनऊ-विश्वविद्यालये अनया महोदयया हिन्दिभाषायां

https://www.gapbhasha.org/

'*विद्यापतिकाव्यशिल्प*' अस्मिन् विषये शोधोपाधिः प्राप्तः। उत्तरप्रदेशस्य कर्णपूर्ण छत्रपती शाहू महाराज विश्वविद्यालयस्य '*विद्यावाचस्पति*' उपाधिः तया प्राप्तः। तदनन्तरं तया शिक्षिकारुपेण अध्यापनकार्यं कृतम्। ततः कालावधेरनन्तरं बिहार-राष्ट्रभाषा-परिषदः अनुसंधानाधिकारिणीरूपेणापि महोदयया कार्यं कृतम्। तथैव पाण्डुलिपि-अन्वेषणं सम्पादनकार्यञ्चापि महोदयया कृतं वर्तते।

महोदयेयं '*व्यासशतकमि*' ति काव्यस्य कर्त्री वर्तते। सा कारयितृप्रतिभया एतद्भिन्नान् खण्डकाव्य-कथा-उपन्यासादिन् मौलिकग्रन्थान् विरचितवती। मौलिकसंस्कृतकृतिषु सुभाषितसुमनाञ्जलिः नामका कृतिः, 'आम्रपाली', 'दशमत्वमसि' चेति नामके द्वे नाटके, '*काव्यायनी*' इति पञ्चाशद्गीतानि विद्यमाना काव्यकृतिरेकाऽस्ति। '*चन्द्रचरितम्*' इति सुभाषचन्द्रजीवनाश्रिता कृतिः, '*लघ्वी*' नाम्नः मिश्रकथासङ्ग्रहः, '*आधुनिका*' नाम्नि कथारचना इति तस्याः प्रसिद्धाः साहित्यकृतयः। '*गउडबहो*' अस्य प्राकृतकाव्यस्यानुवादस्यापि तस्याः कृतिषु समावेशोऽस्ति।
महोदययाऽनया विरचितेषु कृतिषु *व्यासशतकम्* नामकम् शतककाव्यं, सईदपुररोड-पटनानगरतः १९८२ मध्ये वाणी-वाटिका-प्रकाशनेन प्रकाशितम्।
राजभाषा पुरस्कारः, उत्तरप्रदेशसंस्थया प्रदत्तः पुरस्कारः तथैव उत्तर-प्रदेश-हिंदी- संस्थया प्रदत्तः पुरस्कारः एते महोदयया प्राप्ताः पुरस्काराः वर्तन्ते।
*व्यासशतकम्* इति शतककाव्यं व्यासमहर्षेः जीवनचरित्रविषयकं वर्तते।
पुण्यानामतीवाहिनी शुभकरी वाणी सदा राजिता,
लोकनामनुरञ्जनी सुखकरी कारुण्यधारावती।
एकेनैव कवे त्वया नु महती वाणी समाराधिता,
तन्त्रीः शब्दमयी कलं निनदते व्यासाय तस्मै नमः॥
काव्यरचना इयं यंवसंततिलका-शार्दूलविक्रीडित-उपेन्द्रवज्रा-इन्द्रवज्रा-इत्यादि-अनेक-अलङ्कारप्रयुक्ता दृश्यते।

## निष्कर्षः

वैदिक-संस्कृत-साहित्ये, मध्यकालीन-संस्कृत-साहित्ये (सवर्ण्यविषयं) शतककाव्यमिति शीर्षकयुक्ता ग्रन्थाः विरचिताः इति न दृश्यन्ते। अर्वाचीन-संस्कृत-साहित्ये च योगदानं कुर्वद्भिः महिला-लेखिकाभिः (सवर्ण्यविषयं) शतककाव्यमिति शीर्षकान्तर्गतं सङ्खानिबद्धकाव्यरचनयापेक्षया स्वरचिताः रचनाः सरसाः, समृद्धाः, वैविध्यपूर्णाश्च भवेयुः एतद्दृष्ट्या ज्ञानपूर्वकप्रयत्नाः कृता वर्तन्त इति दृश्यते।
ग्रन्थशीर्षकसाम्यता सत्यपि भिन्नकर्तृकाः अनेकाः भिन्नवर्ण्यविषय- विद्यमानाः ग्रन्थरचनाः संस्कृतसाहित्ये विरचिताः विद्यन्ते।
सुभाषितावली, सूक्तमुक्तावली, शार्ङ्गधरपद्धत्यादिषु विकीर्णानि स्फुटपद्यानि दृश्यन्ते। सुभाषितरत्नभाण्डागारः, सुभाषितसुधानिधिः, व्याख्यान-साहित्य-सङ्ग्रहः इति एतासु रचनासु विकीर्णानि स्फुटपद्यानि दृश्यन्ते। अत्र विद्यमानस्फुटपद्यरचनाकर्त्रीणामुल्लेखं दृष्ट्वा कथयितुं शक्यते यत् तत्पद्यकर्त्रीभिः रचितपद्यानां साकल्येन गणना क्रियते चेदत्र तैः पद्यैर्युक्ता सङ्ख्यासंयुता लघुकाव्यरचनाः सिद्धाः भवेयुः। तद्दृष्ट्या साहित्यिकैः तथा च अभ्यासकैः प्रयत्नाः विधातव्याः भवन्ति।

## BIBLIOGRAPHY

[1] (2020). *श्रीवैष्णवी.*
[2] L.D.Barnett. (1939). *SANSKRIT POETESSES* (Vol. 7). london.
[3] *THE STUDENTS' NEW SANSKRIT DICTIONARY* (8TH ed.). (1997). BOMBAY: JYOTI DHANANJAY DHAWALE.
[4] VIRKAR, K. B. (1997). *THE LITTLE MODERN DICTIONARY (ENGLISH-ENGLISH-MARATHI).* PUNE: M. D. NANDURKAR.
[5] Williams, M. (1872). *A Sanskrit-English Dictionary.* London.
[6] गङ्गाशतकम्।. (n.d.). *सूर्योदयः।.*
[7] गुप्त, र. (1956). *सूक्ति सागर* (प्रथम ed.). लखनऊ: उत्तरप्रदेश हिन्दि संस्थान.
[8] राधावल्लभत्रिपाठी (Ed.). (2011). *आधुनिक-संस्कृतसाहित्य-सन्दर्भसूची.* नवदेहली: राष्ट्रियसंस्कृतसंस्थानम्.

https://www.gapbhasha.org/

[9] *व्याख्यानसाहित्यसंग्रह.* (1916). जामनगर: साहित्यप्रकाशक मण्डळ.

[10] शुभ्रजित्सेन, ड. (2019). *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्.* माल्दा, प. बङ्गाल: श्री देबाशिष भट्टाचार्य.